**CLASS : 10th (Secondary)** **Code No. 1908**

**Series : Sec. M/2017**

रोल नं० | | | | | | | | | | |

***SET : A***

# संस्कृत

*(Academic/Open)*

(Only for Fresh Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



Previous Pathshala

## खण्डः 'क'
## (अपठित–अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्ननाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत — $4 \times 2 = 8$

भारतीया संस्कृति संस्कृतभाषाम् आश्रित्य तिष्ठति। भारतस्य आत्मा संस्कृत्या प्रकाशते। संस्कृतभाषायाः पुनरुज्जीवनं तदा भविष्यति यदा जनजीवनस्य प्रत्येके क्षेत्रे संस्कृतस्य प्रयोगः भवेत्। संस्कृतभाषा यदा भारतस्य व्यवहारभाषा आसीत् तदा भारतं 'विश्वगुरुः' इति ख्यातिम् अलभत। विदेशेभ्यः छात्राः अध्ययनार्थम् अत्र आगच्छन्ति स्म। नालन्दा-तक्षशिला-आदि विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठ्यन्ते स्म। पुनः विश्वगुरुत्वं प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीयम् एव।

*प्रश्नाः*

(क) संस्कृतभाषायाः पुनरुज्जीवनं कदा भविष्यति ?

(ख) कस्य आत्मा संस्कृत्या प्रकाशते ?

(ग) छात्राः कुतः अध्ययनार्थं अत्र आगच्छन्ति स्म ?

(घ) केषु विश्व-विद्यालयेषु विविधानि शास्त्राणि पाठ्यन्ते स्म ?

## खण्डः 'ख'
## (रचनात्मकं–कार्यम्)

**2.** (क) भवान् विकासः। अमेरिका-वासतव्यं मित्रं मार्टिनं नैनीतालविषये लिखितं पत्रं मञ्जूषाप्रदत्तैः पदैः पूरयित्वा उत्तर-पुस्तिकायां लिखत — $4 \times 1 = 4$

परीक्षाभवनम्

तिथिः

प्रिय मित्र मार्टिन,



Previous Pathshala

नमोनमः।

गतमासे आवयोः (i) ........... वार्तालापः अभवत्। ह्यः एव अत्र (ii) ........... आरभत्। अनेके (iii) ........... तं द्रष्टुं दूरतः आगताः आसन्। अत्रत्यानि प्राकृतिकदृश्यानि आकर्षकानि (iv) ........... च सन्ति। अहम् इच्छामि ईदृशे अवसरे भवान् अपि भारते आगच्छेत्।

सस्नेहं,

भवतां मित्रम्

विकासः

**मञ्जूषा**

यात्रिणः, दूरभाषेण, मनोरमाणि, हिमपातः।

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत – $4 \times 1 = 4$



Previous Pathshala

***प्रश्नाः***

(i) अस्मिन् चित्रे एक आदर्शः ........... वर्णितः।



Previous Pathshala

(ii) ........... पुस्तकानि सन्ति।

(iii) प्रकोष्ठे मञ्चस्य ........... समाचार-पत्रम् अस्ति।

(iv) पुत्रः ........... चरणस्पर्शम् करोति।

**मञ्जूषा**

उपरि, पितुः, परिवारः, कापाटिकायाम्।

**खण्डः 'ग'**
**(पठित–अवबोधनम्)**

**3.** अधोनिर्दिष्ट गद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

$1 \times 4 = 4$

रामः = एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोवंशस्य कर्त्ता ?

**अथवा**

निहन्यन्ते च विवशाः प्राणिनः। ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति।

**4.** अधोनिर्दिष्ट श्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः – $1 \times 4 = 4$

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च।

**अथवा**

क्रोधो हि शत्रुः प्रथमो नराणां,

देहस्थितो देहविनाशनाय।



Previous Pathshala

यथास्थितः काष्ठगतो हि वह्निः,

स एव वह्निर्दहते शरीरम्।

**5.** अधस्तनसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – $2 \times 2 = 4$

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

(ख) अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः।

(ग) एक एव खगो मानी वने वसति चातकः।

(घ) कृतपरिकरः स्वेदोद्गारं प्रधावति धावति।

**6.** अधः प्रदत्तं गद्यांशं सम्पठ्य निर्दिष्ट-प्रश्नोत्तराणि संस्कृतेन लेखितव्यानि – $3 \times 1 = 3$

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिकाशिलादि सञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति।

(क) केषां विस्फोटैः भूकम्पो जायते ?

(ख) अग्निः शिलादि सञ्चयं किं करोति ?

(ग) भूकम्पविशेषज्ञाः किं कथयन्ति ?

**7.** अधोनिर्दिष्टं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये –

$2 \times 1 = 2$

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च।।

(क) व्यायामिनं का न समधिरोहति ?



Previous Pathshala

(ख) स्थिरं किं भवति ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) प्राणेभ्यो अपि प्रियः सुहृत्।

(ख) चातकः वने वसति।

(ग) आर्यस्य प्रसादेन मे वणिज्या अखण्डिता।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय "शेमुषी भाग-2" स्वपाठ्य- पुस्तकात् ***एकं*** श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**10.** (क) दीर्घ-सन्धेः अथवा व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) तत्पुरुषसमासस्य अथवा द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य अथवा अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –

$3 \times 1 = 3$

(क) ............ जीवनं दुर्वहम् अस्ति। (अत्र, बहिः)

(ख) पर्यावरणस्य संरक्षणम् ............ प्रकृतेः आराधना।

(यत्र, एव)

(ग) ............ हरीतिमा तत्र शुचि पर्यावरणम्। (यत्र, भृशम्)

**12.** प्रदत्तोपपदविभक्ति वाक्येषु उचित विभक्ति प्रयोगं कुरुत –



Previous Pathshala

4 × 1 = 4

(क) ............ परितः वृक्षाः सन्ति। (ग्रामस्य, ग्रामं)

(ख) बालः ............ बधिरः अस्ति। (कर्णेन, कर्णाभ्याम्)

(ग) रमेशः ............ स्पृहयति। (फलेन, फलेभ्यः)

(घ) ............ पत्राणि पतन्ति। (वृक्षात्, वृक्षस्य)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

(क) 'बालक' शब्दस्य चतुर्थी-एकवचने।

(ख) 'लता' शब्दस्य तृतीया-एकवचने।

(ग) 'साधु' शब्दस्य पंचमी-एकवचने।

(घ) 'युष्मद्' शब्दस्य षष्ठी-बहुवचने।

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' लट्लकार, प्र० पु०, द्विवचने।

(ख) 'पठ्' लृट्लकार, म० पु०, एकवचने।

(ग) 'गम्' लङ्लकार, उ० पु०, बहुवचने।

(घ) 'खाद्' लोट्लकार, प्र० पु०, एकवचने।



Previous Pathshala

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत – 3 × 1 = 3

(क) प्रभवति।

(ख) अधिगच्छति।

(ग) उपदिशति।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिक चतुर्षु उत्तरेषु एकं शुद्धम् उत्तरं लिखत – 16 × 1 = 16

(क) 'कः + अत्र' अत्र किं सन्धियुक्तपदम् ?

(i) कात्र

(ii) कोऽत्र

(iii) कोत्र

(iv) कत्र

(ख) 'एकैकः' इति पदस्य कः सन्धिविच्छेदः ?

(i) एका + कः

(ii) एक + एकः



Previous Pathshala

(iii) एकम् + कः

(iv) एकै + कः

(ग) 'यथाशक्ति' इति पदस्य किं विग्रहम् ?

(i) शक्तिम् अनतिक्रम्य

(ii) यथा शक्तिं

(iii) शक्ति अनुरूपम्

(iv) शक्तिं यथा

(घ) 'पर्वतश्रेणी' इति पदे कः समासः ?

(i) कर्मधारयः

(ii) बहुव्रीहिः

(iii) तत्पुरुषः

(iv) द्वन्द्वः

(ङ) 'पण्डितः' इति पदस्य विलोमपदम् ?

(i) मूर्खः

(ii) धनिकः

(iii) देवः

(iv) कुक्कुरः



Previous Pathshala

(च) 'गुणः' इति पदस्य विलोमपदम् ?

(i) गुणाः

(ii) दोषाः

(iii) अदोषाः

(iv) दोषः

(छ) 'राजा' इति पदस्य पर्यायपदम् ?

(i) नृपः

(ii) नरपः

(iii) न्रिपः

(iv) निरपः

(ज) 'जलम्' इति पदस्य पर्यायपदम् ?

(i) रसालम्

(ii) तक्रम्

(iii) सलिलम्

(iv) पाषाणम्

(झ) 'ज्ञान + मतुप्' इति संयोगे किं रूपम् ?



Previous Pathshala

(i) ज्ञानमान्

(ii) ज्ञानमतुप्

(iii) ज्ञानवान्

(iv) ज्ञानमतु

(ञ) 'पशुत्वम्' इति पदे कः प्रत्ययः ?

(i) त्व

(ii) तल्

(iii) ल्यप्

(iv) ल्युट्

(ट) '20' इति अंके किं संख्यावाचीपदम् ?

(i) त्रिशंत्

(ii) विंशत्

(iii) विंशतिः

(iv) विंशतीः

(ठ) 'नवनवतिः' इति पदे का संख्या ?

(i) 9

(ii) 99



Previous Pathshala

(iii) 89

(iv) 69

(ड) 'अतिदीर्घः प्रवासः' अत्र किं विशेष्यपदम् ?

(i) अतिदीर्घः

(ii) प्रवासः

(iii) अति

(iv) दीर्घः

(ढ) 'कुमारयोः कुशलवयोः' अत्र किं विशेषणम् ?

(i) कुश

(ii) लवयोः

(iii) कुशलवयोः

(iv) कुमारयोः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) अहं प्रातः ............ भ्रमणाय गच्छामि।






Previous Pathshala

(ii) ततः ............. विद्यालयं गच्छामि।






Previous Pathshala